# Shri Bala Hridayam 1

# શ્રીબાલાહૃદયમ્ ૧

## Document Information

Text title : Shri Bala Hridayam 1

File name : bAlAhRRidayam.itx

Category : devii, dashamahAvidyA, devI, hRidaya

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીબાલાહૃદયમ્ ૧

શ્રીપાર્વત્યુવાચ-
મહાદેવ નમસ્તુભ્યં વિરૂપાક્ષાય તે નમઃ ।
બાલાયા હૃદયં મન્ત્રં ગોપ્યાદ્ગોપ્યતરં તથા ॥ ૧॥

યસ્ય શ્રવણમાત્રેણ મન્ત્રસિદ્ધિમવાપ્નુયાત્ ।
બાલાયા હૃદયં મન્ત્રં બ્રહ્માદીનાં ચ દુર્લભમ્ ॥ ૨॥

સકૃચ્છ્રવણમાત્રેણ વાઞ્છિતં ફલમાપ્નુયાત્ ।
સઞ્ચારવાન્ ભવેત્પઙ્ગુઃ મૂકો વાગ્મી તુ યો ભવેત્ ॥ ૩॥

અસ્ય શ્રીબાલાત્રિપુરસુન્દરી હૃદયમહામન્ત્રસ્ય દક્ષિણામૂર્તિઃઋષિઃ ।
પઙ્ક્તિશ્છન્દઃ । શ્રીબાલાત્રિપુરસુન્દરી દેવતા ।
ઐં બીજમ્ । સૌઃ શક્તિઃ । ક્લીં કીલકમ્ ।
શ્રીબાલાત્રિપુરસુન્દરીપ્રસાદસિદ્ધ્યર્થે
શ્રીબાલાત્રિપુરસુન્દરી હૃદય મહામન્ત્ર જપે વિનિયોગઃ ।
મૂલેન દ્વિરાવૃત્ત્યા
કર હૃદયન્યાસઃ ।

ધ્યાનમ્ -
અરુણકિરણજાલૈરઞ્જિતા સાવકાશા,
વિધૃતજપવટીકાપુસ્તકાભીતિહસ્તા ।
ઇતરકરવરાઢ્યા ફુલ્લકલ્હારસંસ્થા
નિવસતુ હ્યદી બાલા નિત્યકલ્યાણશીલા ॥

લમિત્યાદિ પઞ્ચપૂજા
મનુઃ -આં હ્રીં ક્રોં ઐં ક્લીં સૌઃ હ્રીં શ્રીં બાલાપરમેશ્વરિ આવેશય
આવેશય આં હ્સૌં મમ હૃદયે ચિરં તિષ્ઠ તિષ્ઠ હું ફટ્ સ્વાહા ।
ઇતિ જપેત્ ।

બાલાયા હૃદયેનૈવ ત્રિકાલં સમમન્ત્રિતમ્ ।
પયઃ પિબતિ યા વન્ધ્યા સા ચ પુત્રવતી ભવેત્ ॥

નિત્યમષ્ટોત્તરશતં બાલાયા હૃદયં જપન્ ।
ચિન્તિતં ચ લભેદ્દેવિ ! નાત્ર કાર્યા વિચારણા ॥

ઇતિ શ્રીબાલાહૃદયં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Hridayam 1*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*